National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 125-128
© 2025 NJHSR
www.sanskritarticle.com

**नन्दिनी देहेरी**
शोधछात्री, साहित्यविभागः,
राष्ट्रिय संस्कृत विश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः,५१७५०७

**Correspondence:**
**नन्दिनी देहेरी**
शोधछात्री, साहित्यविभागः,
राष्ट्रिय संस्कृत विश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः,५१७५०७

# तुलसीदासचरितमहाकाव्ये संस्कारव्यवस्था

**नन्दिनी देहेरी**

### संस्कारशब्दस्य व्युत्पत्तिः-

भारतीयजीवने संस्कारस्य महत्वपूर्णभूमिका घनिष्ठसम्बन्धश्च वर्त्तते। “सम्” उपसर्गपूर्वकं “कृ” धातोः “घञ्” प्रत्ययेन संस्कारशब्दः निष्पद्यते। तस्य अर्थः शुद्धिः,परिष्कारः च, वस्तुतः संस्कृतिशब्दः संस्कारात् निष्पन्नः। यस्य अर्थः परिष्कृतं परिष्करणं संस्करणं च भवति। अस्मिन् अर्थे मनुष्येषु दोषाणां शुद्ध्यर्थं सुसंस्कारं कर्त्तुं संस्कारस्य व्यवस्था कृताऽस्ति। संस्कारा माध्यमेन मानवानां मनः शुद्धं,सन्तुलितं,सुसंस्कृतं च विशिष्टवैज्ञानिकपद्धत्याधारितं भवति। जीवने उपयोगितानि सत्यबीजानि अपि एतेषु संस्कारेषु रोप्यन्ते। यदि बालकस्य सर्वाः संस्काराः सम्यक् वातावरणे,रीतिनीतिः माध्यमेन भवति तर्हि तस्य व्यक्तित्वं सुविकसितं भवति। संस्कारपद्धत्या तस्य मानसिकविकारान् दूरीकृत्य सृजनात्मकशक्तिं वर्धयति। अतः संस्काराः बहुमूल्यजीवनस्य विशिष्टतायाः सम्पदः चरित्रनिर्माणस्य आधारः च भवति।

### संस्कारस्य परिभाषा-

जैमिनीयसूत्रेऽपि संस्कारशब्दस्य बहु प्रयोगः भवति। मीमांसासूत्रस्य व्याख्यायां शबरस्वामी स्वभाष्ये संस्कारशब्दस्य अर्थः उल्लीखितवान् यथा-

**संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य।**
(मी.सू-3/13-शबरटीकायाम्)

- वेदान्तसूत्रस्य शाङ्करभाष्ये यथा-

**संस्कारो हि नाम गुणाधानेन वा स्याद् दोषापनयनेन वा।** (वे.सूत्र.-1/1/4)

- स्वामिदयानन्द मते संस्कारशब्दस्य अर्थः-

**येन शरीरं मन आत्मा चोत्तमा भवन्ति सः संस्कारः इत्युच्यते।**

- अद्वैतवेदान्तीनां मते जीवानाम् उपरि शारीरिकं क्रियायाः मिथ्याऽरोपेव संस्कारः इति मन्यन्ते। यथा-

**स्नानाचमनादिजन्याः संस्कारा देहे उत्पद्यमानानि तदभिधानानि जीवे कल्प्यते।**
(वा.बृ.अ-5,पृ.5188)

- रघुवंशमहाकाव्ये संस्कारशब्दस्यार्थः शिक्षा, संस्कृतिः, प्रशिक्षणं, भावना, धारणा, कार्यस्य च परिणामः, क्रियायाः विशेषताः इति। यथा-

**निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्।** (रघु.-3/35)

**अथवा**

**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।** (रघु.-9/20)

### संस्कारस्य महत्त्वम्-

मानवजीवने संस्काराणां बहुमहत्त्वम् अस्ति। संस्कारस्य महत् उद्देश्यं मनुष्याणां शुद्ध्यर्थं भवति। संस्कार माध्यमेन विचारानुरूपस्य मनुष्यस्य चरित्रं निर्मितं भवति। कारणं चरित्रं तत् सोपानं येन पुरूषस्य सुखं शान्तिं च निहितमस्ति। संस्काराणां माध्यमेन मानवचरित्रे गुणाः प्रविष्टाः भवन्ति।

दोषाः, दुर्गुणाः च दूरी भवन्ति। जन्मतः आरभ्य मृत्युपर्यन्तं मानवजीवनं सार्थकं कृत्वा सत्यस्य शुद्धिकरणार्थं नवीनव्यवस्थायाः नाम संस्कारः अस्ति।

संस्कारस्य प्रधानप्रयोजनम् आध्यात्मिकं नैतिकविकासं च भवति। आध्यात्मिकभावना नाम संस्कारः इति। अतः संस्कारः मानवजीवनं शुद्धं पवित्रं च करोति। संस्काराणां मुख्यम् उद्देश्यं श्रेष्ठ संस्कारयुक्तमानवस्य निर्माणं भवति। संस्काराणां माध्यमेन एव मनुष्याणां विनयपूर्णं- सभ्यव्यवहारस्य प्रवृत्तिः विकसिता भवति। एवमेव सामान्यजनानां मानसिकः,चारित्रिकः, भावनात्मकः विकासाय च सर्वोत्तमः विधानेव संस्काराः। संस्कारमाध्यमेन व्यक्तिः स्वव्यक्तित्त्वस्य परिष्कारं करोति। जन्मतः आरभ्य-मृत्युं यावत् व्यक्तौ षोडशसंस्कारेणान्तर्भूतः भवति।

**संस्कारस्यप्रयोजनम्-**

गृह्यसूत्रे संस्कारस्य विवेचनम् प्रायः विवाहसंस्कारात् आरभ्यते। साधारणतः संस्कारः यद्यापि कस्यचित् व्यक्तेः कृते क्रियते तथापि तस्य सम्बन्धः समग्रसमाजेन साकमासीत्। अतः शास्त्रे उक्तमस्ति "ये मातापितरौ स्वीय सन्तानस्य संस्काराः न कुर्वन्ति ते केवलं मातापितरौ पशवः इव सन्ति।" मनुस्मृत्यापि स्पष्टतया उक्तमस्ति गर्भादिसंस्काराः शरीरं शुद्धयन्ति,इहलोकपरलोकस्य पापात् मुक्तिः भवति। विशिष्टसंस्कारं कृत्वा पुरूषवीर्यस्य स्त्री रजस्य च दोषः दूरीभूतं भवति।यथा मनुस्मृतौ-

**गार्भैर्होमैर्जातकर्मचौलमौन्जीनिबन्धनैः।**
**बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।।**
**वैदिकै कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।**
**कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।** (मनु.2/26)

व्याख्याकारः मेघातिथिः मनोः श्लोकस्य व्याख्यायाम् उक्तं न केवलं शरीरस्य शुद्धिं अपितु आत्माऽपि संस्कारद्वारा शुद्धिः सुसंस्कारश्च भवति। कारणं शुद्धशरीरे पवित्र आत्मा तिष्ठती न तु अशुद्धं शरीरे। एवमेव मानवव्यक्तित्वस्य सर्वाङ्गीणविकासः संस्कारस्य मुख्यं प्रयोजनम्। चरित्र निर्माणस्य प्रथमबीजानिसंस्काराः। विभिन्नसंस्कार-माध्यमेन व्यक्तेः चरित्रे अनुशासनं, विनयं, त्यागं, दानं, समतां, सामाजिकतां च इत्यादयः गुणाः सुदृढाः भवन्ति। संस्कारसमये स्तुति-प्रर्थनादिभिः अमङ्गलस्य नाशः भवति। तथा च यज्ञे ईश्वरस्य आह्वानेन आशीर्वादः शुभकामना च प्राप्यन्ते। जीवनस्य प्रगतिमार्गे एते संस्काराः दृढं सुन्दरं च सोपानानि भवन्ति। यः मनुष्यस्य विचाराणां प्रवृत्तीनां च शुद्धिं नियन्त्रणं निरन्तरम् उन्नतिं च विदधाति। अधिकांशसंस्काराः वाल्यावस्थायां सम्पन्नं भवति। विभिन्न संस्कारमाध्यमेन बालकस्य अपरिपक्वमस्तिष्के दृढं एवं दूरगामी-प्रभावः आगच्छति। संस्कारसमये यत् पवित्रं वातावरणं भवति स्नानादिमाध्यमेन शुद्धिः, मन्त्रोच्चारणादि, परिवारसमाजस्य जनानां एकत्र सम्मिलनमादि बालकस्य मनसि, वुद्धौ च एतादृश संस्कारनियमस्योत्तरदायित्वस्य च प्रभावीरूपेण अनुसरणं कर्त्तुं प्रेरयति।

भारतीयऋषिमुनीनां मते संस्कारमाध्यमेन मनुष्यस्य जीवनं परिष्कारेण साकम् एकं निश्चितं लक्ष्यं प्रति प्रेरणाऽपि परिकल्पिता आसीत्। "पाराशरस्मृति" इत्यस्मिन् ग्रन्थे एकं सुन्दरम् उदाहरणे स्पष्टीकृतमस्ति। यथैव सम्यक्वर्णानां प्रयोगेण संयोगेन च चित्रस्य सौन्दर्यं क्रमेण प्रकाशितः भवति। तथैव विधिविधानपूर्वेण सम्पन्नेन संस्कारेण व्यक्तिः ब्राह्मणेभ्यः अपि प्रतिष्ठितः भवति। जीवनस्य आरम्भात् जीवनस्य अन्तः यावत् एवं च मरणात्परमपि संस्कारस्य क्रमः मनुष्यस्य सम्पूर्णे जीवने व्याप्नोति। एते संस्काराः व्यक्तिं मार्गदर्शनेन साकं लक्ष्यप्राप्तिं च कारयन्ति। एतस्मात् मनुष्यस्य सम्पूर्णजीवनम् अनुशासनस्य विश्रान्तिपूर्णलक्ष्येन बद्धः भवति।

**संस्कारस्य संख्या-**

गृह्यसूत्रे जन्मात् मृत्युं यावत् संस्काराणां वर्णनां भवति। वस्तुतः गर्भाधानादयः षोडशसंस्काराः प्रसिद्धाः सन्ति। परन्तु स्मृतिकाराणां मते संस्कारस्य संख्या भिन्नभिन्न अस्ति। यथा- व्यासस्य मते षोडशसंस्काराः, मनुमते त्रयोदशसंस्काराः, याज्ञवल्क्यस्यमते द्वादश-संस्काराः, आश्वलायनस्य अङ्गिरायाः च मते पञ्चदशसंस्काराः, गौतमस्य मते चत्वारिंशत्संस्काराः, यमस्यमते एकचत्वारिं-शत्संस्काराः वर्त्तन्ते।

**तुलसीदासचरितमहाकाव्ये संस्कारव्यवस्था-**

यथैव वैदिकलौकिकसमाजे संस्कारस्य महत्त्वमासीत् तथैव तुलसीदासचरितमहाकाव्ये संस्कारव्यवस्थायाः महत्वं वर्तते, परन्तु अस्मिन् महाकाव्ये संस्काराणां विस्तृतं विवेचनं नैव प्राप्यते। तथापि काव्येऽस्मिन् संस्काराणां नामोपरि सच्चिदानन्द-अयोध्यानाथ-सरस्वति-हुलसी- आत्मराम- जीवराम- तुलसीदास -रत्नावलीप्रभृतीनां चरित्राणां गर्भाधान-जातकर्म-नामकरणं-समावर्त्तनं-विवाह्-अन्त्येष्टि सम्बन्धि संस्काराणां वर्णनां दृश्यते।

**1.गर्भाधानसंस्कारः-**

गर्भाधानसंस्कारः जन्मनः पूर्वसंस्कारः। "गर्भः सन्धार्यते येव कर्मणा तत् गर्भाधानम्"। संस्कारेऽस्मि वंशस्य, समाजस्य, परिवारस्य च प्रगतिशीलवृद्ध्यार्थं पतिपत्नी स्वमैथुनवृत्तिनियमित्य, नियन्त्रणं च कृत्वा सन्तानं प्राप्तुम् इच्छन्ति। अतः तुलसीदासचरितमहाकाव्येऽपि आत्मरामस्य पत्नी हुलसी गर्भरत्नं धारयति स्म। उत्कृष्टासु शीलवतीषु स्त्रीषु श्रेष्ठा हुलसी धर्मादीनाम् अनुष्ठानेन अर्थात् दान-यज्ञ-तप कारणात् विवर्णवर्णा आसीत्। हर्षेण प्रफुल्लिता हुलसी मुखपङ्कजात् आनन्दं प्रसारयति, गर्भरत्नधारिणी पृथिवी इव अत्यन्तं सुन्दरं दृश्यते स्म। सा श्वश्रुः कूलवृद्धेः गर्भ धारयन् सर्वदा प्रसन्नाः एव तिष्ठती। सम्पूर्णं नीतिनियमविशेषज्ञः धर्मशास्त्रे निष्ठावान् श्रद्धावान् च आत्मरामः स्वपत्न्याः हुलसी इत्यस्याः गर्भावस्थायां लौकिकं तथा वैदिकविधीनां संस्कारः अकरोत्। ये समाजे भ्रूणस्य रक्षणस्य अभिप्रायेण शास्त्रीयविधीविधानेन प्रसन्नहृदयेन परिस्थित्या अनुसारं संस्काराः कृतवान्। यदा सतीहुलसी गर्भस्य नवममासं सम्पन्नं कृत्वा अग्रिमे दशममासे पूर्णगर्भधारणं पदवीं प्राप्तवती। तत्समये यथा पक्वधान्यैः पूर्णक्षेत्रं पूरिता पृथिवीं दृष्ट्वा कृषकाणां हृदयं प्रसन्नं भवति, तथैव प्रसवसमयं समीपं दृष्ट्वा सर्वेषां प्रियजनानां मुखाः आनन्देन प्रकाशिताः प्रसन्नाः च भवन्ति। तदा हुलसी गर्भाधानसमये मुखे हर्षोल्लासितं सौन्दर्यं च आसीत्। सप्तमसर्गेऽपि रत्नावल्याः गर्भाधानसंस्कारः विषये विवर्णितम् अस्ति। यथा कविनोक्तम्-

**गर्भाऽवस्थां किल नवमितै र्माभिरूत्तीर्य साध्वी,**
**प्राप्ते मासे तदनु दशमे पूर्णगर्भ बभूव।**
**तामासन्नप्रसवसमयां पक्वधान्यामिवोर्वीं,**
**संलक्ष्याऽभूत् प्रमदसुमुखस्न्नेहिवर्गः समस्तः।।**

(तु.दा.च.म.-3/13)

**2.जातकर्मसंस्कारः-**

एषः संस्कारः बालकस्य यशवृद्धिः,दीर्घायु च कृते कृतः आसीत्। तस्य जन्ममात्रेण घृतमधुप्रयोगेन स्वर्णसूत्रेण जिह्वाजां ओं इति लिखितम्। ब्राह्मण-गोभिलगृह्यसूत्रे बालकस्य नाम वेद इति कृतम् अस्ति, तथा च सः दीर्घायुः सदा स्वस्थः भवतु इति प्रार्थना कृता अस्ति। काव्येऽस्मिन् यदा आकाशः मेधैः आच्छादितः आसीत् तदा श्रीशुभविक्रमसंवत् 1568 तमे वर्षे श्रावणमासस्यशुक्लपक्षस्य सप्तमतिथौ शुक्रवासरे विशाखा नक्षत्रस्य द्वितीयचरणे च हुलसी अर्कमिव पुत्रं जनयति स्म। आत्मरामः अमृततुल्यपुत्रस्य जन्मकथां श्रुत्वा हर्षोल्लासमभूत्। शीघ्रं हि भीमाशर्मनामकं श्रेष्ठं ब्राह्मणमाहुय जातकर्मसंस्कारात् परं नालच्छेदं कृतवान्। ततः परं प्रसन्नचित्तेन जन्मोत्सवस्यायोजनं कृतवान्। सप्तमसर्गे अपि अत्यन्तः प्रसन्नः तुलसीदासः गो-धनं-वस्त्रं-अन्नानि च दानं कृत्वा नृत्यसङ्गीतादि आयोजनेन पुत्रजन्मोत्सवः पालनं कृतवान्। यथा काव्येऽस्मिन् उक्तम् अस्ति-

**श्रीमद्वर्षे वसुरसशरोर्वीमिते वैक्रमाख्ये,**
**मेधाच्छन्ने नभसि नभसि श्रेष्ठमासीनतिथ्याम्।**
**शुक्ले पक्षे वरभृगुदिने श्रीविशाखाभपादे**
**दैतीयीकेऽर्कमिव हुलसी नन्दनं प्रासविष्ट ।।**

(तु.दा.च.म.-31/4)

**3.नामकरणसंस्कारः-**

उपनिषद्वाङ्मयेऽपि नामकरणसंस्कारविषये विवर्णितम् अस्ति। मनोविज्ञानस्याक्षरविज्ञानस्य च अनुसारेण नामस्य प्रभावः व्यक्तौ स्थूल-सूक्ष्मं व्यक्तित्वेऽपि भवति। जातकर्म संस्कारानन्तरं पिता एव शिशोः नामकरणं करोति। नामकरणसंस्कारान्तर्गतस्य तस्य बालकस्य नामकरणं भवति चेत्, तत् लोकेऽपि प्रयोगः भवति। तथैव स्वगृहे आत्मरामः स्वस्य शुभचिन्तकैः परिवारजनैः सह शुद्धवैदिकसंस्कारैः स्वीय कूलपतिम् आचार्यत्वेन निवार्य स्वपुत्रस्य जन्मनक्षत्रानुसारं नामकरणं तुलसीदासशर्मा इति कृतवान्। अनन्तरम् आत्मरामस्य भ्राताजीवरामः उत्सवम् आचरित्वा स्वीयपुत्रस्य नाम नन्ददासः इति स्थापितवान्। तुलसीदासोऽपि शुभतिथीश्रेष्ठग्रहानुसारेण तस्य पुत्रस्य नाम तारापतिः दत्तवान्।

**4.विद्यारम्भसंस्कारः-**

यदा बालकस्य मस्तिष्कः शिक्षाग्रहणं कृते योग्यः भवति,तदा शिक्षायाऽऽरम्भः विद्यारम्भसंस्कारेण आरब्धाः इति। अस्य संस्कारस्य अनेकानि नामानि दत्तानि सन्ति। विभिन्नेषु धर्मशास्त्रग्रन्थेषु विद्यारम्भः, वर्णारम्भः, वर्णस्वीकरणं, वर्णलेखनम् इत्यादिनि नामानि कृतानि। अतः काव्येऽस्मिन् जीवरामः ज्येष्ठभ्रातु आत्मरामस्य पुत्रस्य वर्णज्ञानम् आरभ्य कर्त्तुं समर्थः दृष्ट्वा तेन शास्त्रविहितः नियमेन सह विद्यारम्भसंस्कारः कृतवान्। सः तुलसीदासः अत्यन्तवुद्धियुक्ता इति कारणात् वर्णानां ज्ञानेन सह लेखनमोच्चारणयोः अतुलप्रतिभा प्रदर्शितवान्।

**5.उपनयनसंस्कारः-**

अथर्ववेदे उपनयनशद्बस्य प्रयोगः ब्रह्मचर्यस्वीकारः इत्यर्थे प्रयुक्तः। ब्राह्मणोपनिषद्सूत्रग्रन्थेऽपि उपनयनसंस्कारः इत्युक्ते ब्रह्मचर्यग्रहणं भवति। वेदे तु उपनयनसंस्काराः बालकस्य द्वितीयजन्मः इति कथ्यन्ते। काव्येऽस्मिन् उपनयनसंस्कारः नाम यज्ञोपवितसंस्कारः इति कविना उक्तम्। सः तुलसीदासः यज्ञोपवितसंस्कारात् अनन्तरं नित्यं सन्ध्यावन्दनां, संस्कृतभाषायाः अध्ययनं कृतवान्। सः ब्रह्मचारी-तुलसीदासः गुरोः प्रसादेन शब्दशास्त्रे (व्याकरणे), काव्यशास्त्रे, रामायणे, महाभारते, धर्मशास्त्रे, वेदपुराणादिषु सम्यक् ज्ञानं लब्धवान्। यथा कविना उक्तम्-

**शब्दागमे काव्यनये स वर्णी रामायणे भारतसत्कथासु।**
**पुराणवेदागमधर्मतत गुरूप्रसादादभवत् सुबोधः।।**

(तु.स.च.म.-4/45)

तुलसीदासस्य भ्राता नन्दनदासोऽपि सूक्ष्मप्रतिभायाः सदाचारी विनीतभावेन परिपूर्णः आसीत्। गुरोः सकाशात् विद्याध्ययनं कृत्वा सः संस्कृतवाङ्मयस्य विद्वान् अभवत्।

**6.समावर्तनसंस्कारः-**

समावर्त्तनसंस्कारः इत्युक्ते ब्रह्मचर्यस्य समाप्तिः विद्यार्थीजीवनस्य अन्तः वा। समावर्तन शब्दस्य अर्थः वेदाध्ययनानन्तरं गूरुकुलात् स्वगृहागमनम्। यथा-

**तत्र समावर्तनं नाम वेदाध्ययनानन्तरं गुरूकूलात् स्वगृहागमनम्।**

तथैव दौ भ्रातरौ अर्थात् तुलसीदासनन्दनदासौ च विद्याध्ययन-मानन्तरं समावर्त्तनसंस्कारः पश्चात् गुरूचरणकमलं पूयित्वा स्व स्व गृहे निवसन्ति स्म। उभौ भ्रातारौ सुशिक्षितौ सुशीलौ च आस्ताम्। कृषिकार्यं पुराणादिकथा कथनस्य वृत्तिः च तयोः जीवननिर्वाहस्य साधनम् आसीत्।

**7.विवाहसंस्कारः-**

हिन्दुधर्मे विवाहः पवित्रतमः धार्मिकः च संस्कारः इति कथ्यन्ते। विवाहः अतीवपवित्रवन्धनम् इति मन्यते। वेदेषु उक्तम् अस्ति द्वे शरीरे, द्वे मनसि, द्वे हृदये, द्वे प्राणे च संयोगेव पवित्रविवाहसंस्कारः भवति। विवाहसंस्कारे ब्रह्मचारी गृहस्थधर्मे पदार्पणं करोति। काव्येऽस्मिन् पितामही तुलसीदासं श्रेष्ठलक्षणयुक्तं, उद्योगशीलं, वुद्धिमान् युवकः विवाहयोग्यं मत्वा विवाहं कर्त्तुमिच्छति। गङ्गाया-पारम् उत्तरदिशि बदरिया इति नगरम् अस्ति यत् पूर्वं सोरोन् सुकरक्षेत्रस्य उपनगरम् इति आसीत्। तस्मिन् उपनगरे श्रेष्ठविवेकशीला जनानां सम्माननीयः श्रेष्ठाणां मध्ये श्रेष्ठतमः धनीवशिष्ठः गोत्रीय दीनबन्धुपाठक नामकः सनाढ्य ब्राह्मणः निवसति। तस्य रत्नावली नामा कन्या आसीत्। या वुद्धिमती, शिष्टा, कूलङ्गनानां मूर्धन्याः, आदरयुक्ता, उत्तमगुणा स्वाभाविकी कवित्व प्रतिभायुक्ता च आसीत्। सः दीनबन्धुपाठकः तुलसीदासः योग्यवरं

इति ज्ञात्वा तस्य पुत्री रत्नावल्याः विवाहः तुलसीदासेन सह स्थिरं कृतवान्। 1589 विक्रमसंवत्सरे कार्त्तिकमासशुक्लपक्ष एकादश्यां गुरुवासरे शुभलग्नौ वैदिकविधिविधानेन वह्निविद्वत्समक्षे श्रेष्ठगुणयुक्तः तुलसीदासः रत्नावल्या सह विवाहः कृतवान्। यथा इन्द्रः शचिना साकं,शङ्करः हिमालयस्यपुत्री उमया सह कृतवान्। तथैव विद्वसु अग्रगण्यदीनबन्धुः अपि स्वपुत्र्याः अनुरूपमुपयुक्तं वरं प्राप्य विवाहसमारोहं सम्पन्नं कृत्वा कृतज्ञः अभवत्।

**8.अन्त्येष्टिसंस्कारः-**

हिन्दुसमाजे मानवस्य अन्तिमसंस्कारः अन्त्येष्टिसंस्कारः भवति। येन सः स्वपार्थिवशरीरस्य अन्तिमाध्यायः समाप्तं करोति। कारणं हिन्दुधर्मे इहलोकस्य अपेक्षा परलोकस्य मूल्यमुच्चतरम् अस्ति। वौधायनसूत्रेऽपि प्रसिद्धम् अस्ति जन्मोत्तरसंस्कार माध्यमेन व्यक्तोः मनुष्यः इहलोकं जित्वा मरणोत्तरे संस्कारे परलोकं जयति। यथा-

**यातसंस्कारेणेमं लोकमभिजयति मृतसंस्कारेणामुलोकम्।**

विवाहपुत्रौ गृहस्य उत्तरदायित्वं समर्प्य श्रीसच्चिदानन्दः परमभक्त्या दिवारात्रौ भगवतः श्रीरामस्य पूजाम् अकरोत्। सः वृद्धावस्थायां भगवतः श्रीरामस्य चरणकमलेषु नित्यं ध्यानं कुर्वन् मृत्योः अनन्तरम् आनन्दमयशाकेतं अर्थात् स्वर्गम् इति प्राप्तवान्। पितुः निधनानन्तरं द्वौ पुत्रौ शास्त्रोक्तविधिना अन्त्येष्टिकार्यं सम्पाद्य एतत्सर्वं कालनियन्त्रणम् इति मत्वा शोकं त्यक्तवन्तौ। श्रीसच्चिदानन्दमृत्योः किञ्चित्कालानन्तरं दैवयोगेन अयोध्यानाथः रोगग्रस्तः अभवत्। तस्मिन् काले सः अर्थात् अयोध्यानाथः पुत्र्यहुलस्या सह आत्मरामं आहूतः स्वस्य सम्पत्तिं सर्वं स्वभगिनये च दत्तवान्। पुण्यात्मा शुभगुणसम्पन्नः अयोध्यानाथः स्वर्गं गतवान्। पितरं स्वर्गं गच्छन्तं दृष्ट्वा हुलसी अत्यन्तं शोकग्रस्तः, व्याकूलः च भूत्वा तस्य अनेकगुणान् आशीर्वादान् च स्मरणं कृत्वा बहु रोदती। अयोध्यानाथस्य अन्तिमसंस्कारः सम्यक् सम्पन्नं कृत्वा आत्मरामः श्रीमती सरस्वती मनः शान्ति निमन्ते स्वश्वसुरग्रामे कानिचनदिनानि यावत् निवसति स्म। सरस्वती अकस्मात् स्वर्गं गतवती। एवमेव पूर्वजन्मस्य दुष्कृत्य परिणामस्वरूपः हुलसी उदरे मृत्युतुल्य विषुची अभवत्। तस्य रोगस्य पीडायाः कारणात् हुलस्याऽपि देवलोकस्य अतिथिः अभवत्। भार्यायाः आकस्मिकमृत्युं दृष्ट्वा आत्मरामस्य हृदयं शोकेन व्याकूलः दुखितः च स्थित्वा शान्तिं न प्राप्नोत्। तस्य मनसि शोकः देहान्तर्गतदाहः च शोकज्वरेण परिणतः। अत्याधिकदुर्बलः भूत्वा सः रोगग्रस्तः आत्मरामः शरीरं त्यक्त्वा स्वपत्न्या सह स्वर्गलोकं गतवान्। आत्मरामस्य वृद्धामाता स्वपुत्रः स्वर्गं गतवान् इति दृष्ट्वा दुःखिता भूमौ पतिता। सा दुःखेन तस्य क्रन्दनस्य प्रभावात् चेतनहृदयस्य किं वक्तव्यं शिलाऽपि अवश्यमेव स्फुटति स्म। पितृतुल्यो स्वीय ज्येष्ठभ्रातां दिवंगतं दृष्ट्वा जीवरामस्य हृदयमपि खिन्नम् अभवत्। कथमपि धर्येण सह जीवरामः स्वभ्रातुः आत्मरामस्य अन्त्येष्टिक्रिया वैदिकविधिविधानेन कृतवान्। अनन्तरं जीवरामः दुर्भाग्यवशतः यक्ष्मारोगेण पीडितः सन् एकवर्षपर्यन्तं दुःखं प्राप्य स्वर्गं गतः। एवमेव बहुदुःखेन दैवं दण्डधरं विधिश्च बहुशः क्रुरं शपन्ती एवं गतप्राणं मृतं देहस्य दाहादि संस्कारं कृत्वा इष्टजनाः एवं विवेकीपुरूषाः चम्पा एवं वृद्धामाता शोकमोहं च दूरीकर्त्तुं ज्ञानपूर्णवचनेन प्रेमपूर्वकं सान्त्वना दीयते। जातस्य हि मृत्यु निश्चितं, मृत्युः अनन्तरं प्रत्येकस्य जीवस्य जन्मोऽपि निश्चितम्। श्रीमद्भगवद्गितायामऽपि कथितम्-

**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।**

(श्री.म.भ.गी.-2/27)

यत्किमपि दृश्यमान चेतनजगत् अस्ति तत्सम्पूर्णं नश्वरम्। आत्मा एव नित्यः अमरः च। शरीरे स्थितानां जीवानाम् आसक्तिः स्नेहः च अज्ञानीनां कृते शोकप्रदः दुःखदः भवति। अतः हृदि सम्यक् विचारान् कृत्वा एव बुद्धाः शोकसमुद्रं तरितुं शक्नुवन्ति। अस्मिन् संसारे भाग्यवशात् जीवाः मिलन्ति विरहन्ति च इति सान्त्वाना दीयते। सप्तमसर्गे तुलसीदासस्य पुत्रः तारापती,पितामही अम्बिकायाः अन्त्येष्टिसंस्कारः अभवत्। दशमसर्गे राजायति मृतात्मा मृतशरीरस्य अन्तिमक्रिया बिषये वर्णितम्। एकादशसर्गे 1680 तमे वर्षे श्रावणमासस्य कृष्णपक्षतृतीयायां शनिवासरे गङ्गायाः तटे स्वस्य नश्वरशरीरं त्यक्त्वा स्वकीर्तिं स्थापयित्वा महाकवितुलसीदासः स्वर्गस्थः साकेतधामं प्रति प्रस्थितवान्। यथा कविना उक्तम्-

**असीगङ्गातीरे खवसुरसचन्द्राऽब्दनभस-**
**स्तमः पक्षे सौरौ हिमगिरिसुतादैवततिथौ।**
**क्षरात्मानं त्यक्त्वा स्वयश इह धृत्वाऽक्षयपदं**
**दिविष्ठं साकेतं सुकवितुलसीदास उदगात्।।**

(तु.दा.च.म.-11/61)

विदेशीपर्यटकोऽपि अस्माकं संस्कारपद्धतिं बहु प्रशंसति। तैः कथितम् अस्ति-भारतीयनागरिकाः गर्भप्राप्तिसमयतः मृत्युपर्यन्तं सुयोग्यगुरूणां सन्निकर्षे जीवनकुसुमसौरभम् अतिवाहितं क्रियन्ते। अतः सर्वेषां मानवानां कृते संस्काराः अत्यावश्यकः येन मानवाः सुसंस्कृतं,सुगुणयुक्तं,पवित्रं च भवन्ति। एते संस्काराः काव्येऽस्मिन् हरिप्रसाद द्विवेदी शास्त्रीणां उल्लिखीतवान्।

**सन्दर्भग्रन्थसूची-**


1. वैदिक संस्कृति-आचार्य डॉ.जयदेव वेदालंकारः, न्यु भारतीय बुक कार्पोरेशिन, जवाहर नगर दिल्ली-110007, प्रथम संस्करणम्-2009।
2. हिन्दु समाज सामाजिक तथा धार्मिकाध्ययन-डॉ.राजबली पाण्डेय, चौखम्बा विद्याभवन, वाराणसी-221001 ।
3. संस्कृतंसंस्कृतिः संस्कारश्च - शशिप्रभा कुमार, विद्यानिधी प्रकाशनम्, दिल्ली-110094, प्रथम संस्करणम्-2009 ।
4. सोलह हिन्दु संस्कर-डॉ.प्रीतिप्रभा गोयल, अरिहन्त प्रकाशनम्, योधपुर, प्रथम संस्करणम्-2012 ।
5. गोस्वामितुलसीदासचरितं महाकाव्यम्-पं.हरिप्रसाद द्विवेदी शास्त्री, रामजीवन द्विवेदी प्रकाशन्, कृष्ण सदन, 70-विवेक विहार, ज्वालापुर, हरिद्वार-249407 ।
6. श्रीमद्भगवद्गीता - गीताप्रेस, गोरखपुर (गोविन्दभवन-कार्यालय, कोलकातासंस्थान-273005